बुक-पोस्ट प्रकाशित सामग्री

गुरुकुल पत्रिका । प्रहलाद । आर्य भट्ट

रजि० संख्या एल० १२७७

सेवा में,

Librarian,
Dibrugarh University, Assam.

No-29

व्यवसाय प्रबन्धक
गुरुकुल काँगड़ी विश्वविद्यालय
हरिद्वार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1) विषय - व्याकरण

पेज = 1   NO-29

= 27×11.5×0.1 c.m.

अनर्थकः क्रिया आदयते गृह्यतेऽनेनेत्यादि भुवः क्रिया

... ...

ग्रहकारपर्यंतनाभ्यामकर्षिमृतेन ग्लायतीत्यादौ नगुणः

2) पेज = 2

= 29×14×0.1 c.m.

नाम = नेकार्थध्वनमञ्जरी

लेखक = काश्मीरमनाथे महारामाणिक

~~जय~~ गम्लगतौ मया इवयते इत्यतयः ४ दिहिर्ज हिमेंह

... ...

पिपासालोभयोमूला भुवनं लोकतोययोः शवपबाल

3) संवत् - १८२४

लेखक - मिसलेखराज

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नाम - अनंतव्रतकथा

20 × 9.5 × 0.1 c.m.

पेज = 1

कुरुक्षेत्रपति ग्राही विप्रोभूत्वा ध्रुवापर्वारी ॥ ७७॥

गुरुादि ने लिखित । श्री ध्रुलेब राजपठनार्थ हरदपालखे
-प्पा

(4) श्रीमद भागवत महात्म्य

पेज = 2

= 26.2 × 13.3 × 0.1 c.m.

हर्षचित्तेसमावहः ॥ ज्यायसुख साद्यात्रक्तते

श्रीमद्भागवती प्या कोविधी स्तत्र त्वयोमभेदं

(5) तर्क भाषा

– 30 × 6 × 0.1 cm

पेज – 1

पार्थिव्या घपट द्रव्या न्याश्रितोगुणोभूतत्वेयतिगुणात्वात्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रयोगत्रव सुद्द्यादयः पार्थिव्या घवट द्रव्यातिरिक्त

(1)

भवनंभू: क्रिया आदीयते गस्यते ऽनेनेत्यादि भव: क्रि
यासामान्यस्य वाचक आदिर्भ्वादि: अनादि पाठ्योत्प
आद्यस्या योऽयमा द्यनिश्चादि उच्चारणमात्रं त्रि:
भ्वादिरिति तथ्या चादि शब्दो व्यवस्थायां प्रकारे च
वर्तते तथा चात्र प्रकारवाचिनादि शब्देन भू शब्द
स्यान्वये क्रियावचन इति लभ्यते व्यवस्थावाचि
नाशब्देन भू शब्द स्यान्वये भू शब्दादारभ्य दश
गणपठित समुदाय इति लभ्यते माधवेनाह क्रि
यावचनो भ्वादि धातुसंज्ञं स्यात्.
एकादि वर्णाः यलमाः सताः एषु वर्णेषु मकारोऽप
यवौ चतुर्थः ॥ अङ्गः सम्यगा यद्दात् नित्यनाऽत्र
सार स्वनीयो नरस्य नतः स्यात् ॥१॥
असेधीदिति सिद्ध: सिध्शब्दादौ गत्यर्थेति क्त:
सिद्धो निष्पन्नो नो निष्पन्नो नेति सिद्धांत: यद्वा
शास्त्रानिर्णीतत्वेनाभ्युपगतोऽर्थ: सिद्धांत: अन्यार्थे
बहुव्रीहि: चंद्रोऽस्यापि त्वेनास्या इति चंद्रिका
आद्यकाविनीक: सिद्धांता नां चंद्रिका सा अपा
कुमुदादीनां प्रकाशिका तत्पैव यंसरस्वती स्तनारां
प्रकाशिका इति साद्दृश्यानमौणप्रयोग:
अयसवे कृतार्थार्यालिङ्ग समुदायस्य विशेषणम्
स्त्रैकवचन मतन्त्रम् कंठ: कलापस्योति ।
नचत्रोच्यते नोक कलापौ यद्यपि
वाचिनो न वक्तव्या पिल गणायात्र द्वे
द्वे तिःकुतसया जैइ बाधितित्वात्स्य ध्विन्द ।।
धनोति चंपक वनानि धुनोत्यशोकं चूतन्धुनाति धवति
स्फुटितातिमुक्तम् ।। वायुर्विधूनयति चंपक पुष्परेणू
न्यत्कानने धवति चन्दनमञ्जरीञ्च ॥१॥
अत्र हारभगवान्वेदव्यासो महामुनि: ।। नानिकिं
पदरत्नानि सन्निपातेषिजास्वदे ॥२॥ इति कवि:
धूञ् धातु: स्वादौ क्र्यादौ तुदादौ चुरादौ च स्यादिष्
मे सं विशेष्य मित्याहुर्भेदकं च विशेषणम् ॥ विशेष्यं तत्र
तं स्माद् न ग्रधानं विशेषणम् १ भेद्यभेदकयो:
संबंधोऽन्योन्यमुच्यते ॥ द्विष्ठो यद्यपि संबंध: षष्ठ्युत
तिनुभेदकात् ॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेधां॰ परार्थस्यार्थनिर्देशादप्रधानं विशेषणं
विशेष्यं तु प्रधानं स्यात्स्वार्थस्यैव प्रकाशनात् ॥

यस्मिन्नर्थे विधीयते तत्पादिनस्यादि
तद्धिताः समासो वाक्यमेव यत्र स उक्तः
अन्यमानतः १ उक्तानुक्तनिर्भेदेन
कारकाणि भवन्तीयम् उक्तेनु प्रथमैव
स्यादनुक्ते तु यथाक्रमम् २ सर्वसाक्षि
चानुबंधकृतमनेकाकालत्वम् विदिष्टं साप
शब्दं नित्यमातिष्ठते। नित्यत्वेन प्रतिजानीते
संश्रयेते करणादीनिरोत्वेन। अत्र यतीत्यर्थः
मंत्रकरणे किम् भर्तारमुपतिष्ठति यौवनेन।
आदित्यमुपतिष्ठ। नेकर्थेनहि तुल्यं स्तुतिभिः पर्या
स्यन्तस्य सरस्वतीभिः। देवतात्वारोपेनमस्य देवतां
श्रीत्वात्। मित्रकः अमेंडपनिष्ठतीति नेउपतिष्ठति वा
लिप्सया गच्छतीत्यर्थः। उत्तपते वितपते दीव्य तस्य
अकर्मकाच्च उत्तपते वितपते पाणिं वा। नेह। सुवर्णमुत्त
पति। संतापयति विलापयति इत्यर्थः। चैत्रो मैत्रस्य पाणि
मुत्तपति संतापयतीत्यर्थः। आङोयमहनः। आयच्छते
अकर्मकात् स्वांगकर्मकाच्चेति। नेह आत्मनाहन्ति।
कथन्तर्हि आजघ्ने विषमविलोचनस्य वक्षः इति भारवि आह धन्ममार घनं पिनिमाहित्य अमंदम्
वाणैर्मित्रभागवृत्तिः प्राप्येत्यधाहारेण कोऽपि
पंचमीतितुल्यवत्वं विनैव तदपवागतिर्यत्र
ताद्धित्यम्। मंत्रणमित्यादि। उपसंनाथ्यापारे तात्
समीपमेत्येतिवा। स्वचनम्परदोषाविष्करणम्।
सूचनेकिम्। उदायस्तपादम् आक्रुष्टवानित्यर्थः।
अयताम्भोविद्वन् ग्लायति गायतीति रूपद्वयं साधयतांचेतस
अस्तुनिम्नवतां सरस्वतीयं। अणुभ्ग्लेहर्षक्षये इत्यस्य
धातु संज्ञायां तस्मात्तिवाच्चुत्सतौ ग्लैति र आप कर्त
रीत्यप्। पकारस्य लोपे ग्लैअ ति इत्यवस्थायां गुणा
यादेशौ प्राप्नोत योर्मध्ये कतरेण भवितव्यमिति संदेहे
परत्वाद्गुणे नोत्पन्ने बुध्यतां गुणो जाते एकारस्य एकारे
अयादेशे ग्लयतीति रूपं स्यात्कथं साध्यते ग्लायतीति
कथंभरस्य नाम अणुभो अरदोन्नामिनो गुण इत्यत्र
तकारस्य नामिनो गुण इतिवक्तव्ये यच्च विधेरेषु
विपरीतग्रहणम् तदिकारभव अरकारपर्यन्तन्ना
म्नश्च कर्तरि विलायनी त्यादीन् यदा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ स्मल्हातौमयाइक्षमे इत्यनयोः ४ दिहिर्दुहिर्मेहतिरोहरिवहिर्नहिस्तृषश्चेदहातिस्तथ्यालिहिः इमेऽनिहे
शविहमक्तसंज्ञयागणेषुहोताः प्रविमत्यकीर्त्तिताः ९ इहानिट्कारिकायांइमेऽनिहोऽशेध्यात्तेवोहो
नामयाकीर्त्तितामन्ल्थितांकोहपाः मक्तसंज्ञयाः मक्तः संज्ञायोयेषुतेमक्तसंज्ञायाः किंकृत्वागणेषुहो
तानुपवेमज्यमि[illegible]कृत्वानेके दिहिः दिहउपचयेदुहिः दुहप्रपूरणे मोवादिकोनरूहात्तेस्त्रादादिकएवा
निरितिशेषः मेहतिरोहतौमिहसेचने रुहवीजजन्मनिप्रादुर्भावेचवहिः वहप्रापणेषुपुनः शेषो
नहिः नहवंधने दहतिदहभस्मीकरणे तथ्यालिहेः लिहआस्वादने ५ दिशिंदृशिंदंशिमथोम
शिंस्पृशिंरिशिंरुशिंक्रोशतिमष्टमंविशिम् निरोचशान्तान् निटःपुराणगाः पठंतिपाठेषुदशे
वनेतरान् ८ पुराणगाः प्राचीनाः विद्वांसः गणपाठेषु शांतान् अनिट्कान् दशैवपठंति इतरान् न
तान्कान् दिशिदिश अतिसर्जने दृशिदृशिरप्रेक्षणे दंशि दंश दंशने अयोमृशिंमृश आमर्षणे
स्पृशिंस्पृश संस्पर्शने रिशिरुशिरिशरुशहिंसायां अष्टमं क्रोशति क्रुश आह्वाने रोदने च विशिं
विश प्रवेशने लिशिंलिश अल्पीभावे दिवादिस्यो लिशगतौ तुदादिस्थइन्त्तुमयम् ८ रुधिसराधि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

नेनते ह सोतान् धातून् अनिटः मत्सकाशात् यूयं निबोधत जानीत लोटो मध्यमपुरुषस्य बहुवचनम् ।
शकिस्तकं तेषु नेडेक उच्यते च सिस्त्र सांतेषु वसिः प्रसारणी रमिस्त्र मांतेषु प्रथमे यते यमिस्मृत स्त जौ यो ल
भिर्वचनेतरे २ हसांतान् धातून् कादिक्रमेण आह कांतेषु शकिः एकः अनिट् शक्लृ शक्तौ प्रकमर्षणे ।
दैवादिकस्तु सेट् सांतेसु घसिः घस्लृ अदने अदादेशो वसिस्त्र च पुनः वसिः प्रसारणी वस निवासे प्रसा
रणीं संप्रसारणं स्यात् इति प्रसारणी एतेन वस आच्छादने आदादिकः सेट् संप्रसारणाभावात् मांते
षु रमिः रमु क्रीडायां स्त्र प्रथमे पुंस्त्यमिः यम मैथुने नजस्तजौ यो लभोः अनिट् डुलभष् प्राप्तौ मया
इष्यते इत्यन्वयः इत्येते धातवो अनिटो न २ यमिर्जे मांतेषु निडेक उच्यते रमिर्दिवादावपि पठ्यते मनिः
नमिस्त्र तथैव हन्तिस्त्र एवमागमिस्तथष्टः प्रतिषेधवाचिनाम् ४ जमांतेषु जमप्रत्याहारांतेषु धातु
षु प्रतिषेधवाचिनाउइति निषेधकानां मध्ये एकः अनिट् यमिः यम उपरमे रमिस्त्र रमु क्रीडायां स्त्र
यि दिवादौ दिवादिगणे यः मनिः विवदतो पठ्यते समनिः मन ज्ञाने दैवादिकः मन अवबोधने ।
तानादिकः सेट् तथा नमिः णम प्रह्वत्वे शब्दे च पंचमो हन्तिः हन हिंसागत्योः न पुनः षष्ठो गमिः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाचकः शैलेन्द्राणविशेषेषुर्के त्रिषु गर्भे दितिसुतिः ८२ वाल्मीकस्तु समीकः स्याद्वाल्मीको
वाग्विशारदः समाजः कुंजरोत्तेयः समाजः समयोमृतः ८३ वाजिका पक्षिजातिः स्या
द्वाजिका नीलमक्षिका सारमेयो लक्ष्मणः श्रोक्तो लक्ष्मणो राघवानुजः ८४ लक्ष्मा
त्मकेद जातिः स्याच्चिह्नं लक्ष्म च कथ्यते शंकरं वृषभेच्छे देविषयशंकरं मतं कंजः
केशे निधौ कंजं केजंपी पूषपद्मयो इति श्रीकाश्मीराम्नाये महाक्षपणिकविरचितानां
नेकार्थध्वनिमंजर्यां मर्हश्लोकारोहद्वितीयः कांडः २ अथपदाधिकारः राजा चंद्रो नृ
पो राजा पयः क्षीरं पयो जलं मित्रो भानुः सुहृन्मित्रं दरं छिद्रं दरं भयं श्रीकंठः स्याद्धरः
स्थाणुर्हरः कृष्णागाच्युताग्रजा गंधर्वो द्विरगो सकौ शिवकंठो वृषाकपी १ प्रा
रीतेल्लेशयोः कायः संधावधिप्रतिज्ञयोः तेजः पुरीषयोर्वर्चः सौवर्चो भक्तकनकयोः
३ सरित्समुद्रयोः सिंधुः शालः प्राकारवृक्षयोः वानकापत्ययोस्तोकं पापव्यसन
योरघं ४ पिपासालोभयोस्तृष्णा भुवनलोकतोययोः शंबबालतृणो प्रोक्तं दा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अ॰
म॰ २॰
११

रुकाहुतिर्गद्यते ५ शैशवे दारके बाल्ये किंकिणी क्षुद्रघंटिका स्कंधाग्रमध्ययोः
कक्षे वाडवस्त्वग्निविप्रयोः ६ निरिंद्रियोऽल्पबुद्धिः स्याद्विष्णोः शृंगवाणौ शिलीमुखौ स्मर
मानावनिमिषौ बाष्पऽस्मा तथाश्रु च ७ गोर्वः पुरी स्थवेगस्त्व वनं काननमेव च इला
भूमिर्मता गौश्च सेना विश्वनामच ८ शैलोऽद्रिः शुभ्रमानद्धिर्भानुर्भानुरहस्करः हस्तजा
तिगजौ पीलुद्रौ रोगमार्गणौ ९ हस्तकरौष्ट्रौ च करभौ हावौ कंदनविभ्रमौ तवा
रापानलौ दावौ जीमूतौ मेघपर्वतौ १० वल्लवौ सूदगोपालौ चिकुरौ केशचंचलौ ध
मयऽउत्कलकथ्यकरभौ लक्ष्मी रमा च निगद्यते ११ कंपनौ शिशिरौ जीनी हारो हिमऽउच्य
ते अरिष्टपिष्टकौ कल्कौ हृत्रौ दाचव वैरिणौ १२ पंगुपद्माहस्ताः शांगावेदो व्योमवा
स्मसी उदावर्गौ रहस्हं तौ न्यग्रोधौ वटकामुकौ १३ धांक्षः काकोवकौ ध्वांक्षो नगः
शैलोऽद्रुमो नगः खलोऽधमः खलः क्रूरः क्षितिः पृथ्वी क्षितिः क्षयः १४ कंदोऽघनिर्गोलः
कंदः शुक्तिः कूपः शुक्तिः स्मरवदे शूकर कोलः कलिः कलहकालयोः १५ कोदंडो ११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

।अनंतकथाकिपोथी।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनंत
११

कुरुक्षेत्रे पतिं ग्राह विप्रो भूत्वा स्वपर्वते ॥ ७७ ॥ चेद्गृहस्य स्यात्तेनैव
दृष्ट्वा ऋषी भवेत्तदा ॥ इत्युक्त्वा भगवान्तस्मै तत्रैवांतरधीयते ॥ ७८ ॥
कौंडिन्य उवाच ॥ भगवान्वचनं श्रुत्वा कौंडिन्य ऋषयस्तथा ॥
वेदयं च तदा लोका सुशीला यत्र तिष्ठति ॥ ७९ ॥ श्रीकृष्ण उवाच ॥
इति सत्समिदं पुण्यं धनधान्य यशस्करं ॥ सर्वकामप्रदं श्रुत्वा नै
कुष्ठपदं दायकं ॥ ८० ॥ मया तो कथितं गुरुत्वं अनंतव्रतमुत्तमं ॥
८१ ॥ इति श्री भविष्योत्तरपुराणे अनंतव्रतकथा संपूर्णं समा
प्तं ॥ ॥ शुभमस्तु ॥ संवत १८१४ वर्षे भाद्रपद सुदि तृतीया
गुरुदिने लिखितं मिश्र लेखराजपठनार्थं हरदयाल लेषकपा
... कल्याणं कुरु ॥ ॥ शुभमस्तु ॥ मां गलं ददातु श्री रस्तु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ना॰मा॰ ६ प्रर्षेहर्षवित्तेसमावहः॥उपायसुखसाध्योत्रवर्त्ततेपूर्वएवहि॥५२॥अहोनारदधन्यो
सिविरक्तानांशिरोमणिः॥सदाश्रीकृष्णदासानामग्रणीयोगभास्करः॥त्वयिचित्रंन
मंतव्यंभक्त्यर्थमनुवर्त्तिनि॥घटतेश्रीकृष्णदासस्यभक्तेःस्थापनतासदा॥५४॥ऋषिभिः
नः४ बहवोलोकेपंथाःप्रकटीकृताः॥श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलावहाः॥५५॥वैकुं
ठसाधकःपंथाःसतुगोप्योहिवर्त्तते॥तस्योपदेष्टापुरुषःप्रायोभाग्येनलभ्यते॥५६॥स
त्कर्मतवनिर्दिष्टंव्योमवाचातुयत्पुरा॥तदुच्यतेशृणुष्वाद्यस्थिरचित्तःप्रसन्नधीः॥५७॥
द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे॥स्वाध्यायज्ञानयज्ञाश्चतेतुकर्मविसूचि
काः॥सत्कर्मसूचकोनूनंज्ञानयज्ञःस्मृतोबुधैः॥श्रीमद्भागवतालापःसंगीतोहिशुका
दिभिः॥५८॥भक्तिज्ञानविरागाणांतद्घोषेणबलंमहत्॥व्रजिष्यतितयोःकष्टंसुखंभ
क्तेर्भविष्यति॥६०॥प्रलयंहिगमिष्यंतिश्रीमद्भागवतध्वने॥कलिदोषाइमेस
र्वेसिंहशब्दाद्वृकाइव॥६१॥ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा॥प्रतिगेहंप्रतिजनं
ततःक्रीडांकरिष्यति॥६२॥श्रीनारदउवाच॥वेदवेदांतघोषैश्चगीतापाठैःप्रबोधितं
भक्तिज्ञानविरागाणांनोदतिष्टत्रिकंयदा॥श्रीमद्भागवतालापात्कथंबोधमेष्य
ति॥तत्कथासुचवेदार्थःश्लोकेश्लोकेपदेपदे॥६४॥छिंदंतुसंशयंह्येनंभवंतोमोघदर्शी
नाः॥विलंबोनात्रकर्त्तव्यःशरणागतवत्सलाः॥६५॥कुमाराऊचुः॥वेदोपनिषदांसारात् राम ६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तातपश्चान्यत्किंयंतस्तपलायि॥३७॥ हाहाकारो महानासीत्त्रिलोके विस्मयावहः॥ वेदवेदां
तघोषैश्च गीतापाठैश्च बोधितः॥३८॥ भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा॥ उपा
यो नापरोऽस्तीति कर्णे कर्णेऽजपन्जनाः॥३९॥ योगिना नारदेनापि स्वयं न ज्ञायते तु यत्॥ तत्क
थं शक्यते वक्तुमितरैरिह मानुषैः॥४०॥ एवं ऋषिगणैः पृष्टैः निर्णीयोक्तं दुरासदं॥ ततः
खिन्नो नारदोऽसौ बदरीवनमागतः॥४१॥ तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः॥ तावद्द
दर्श पुरतः सनकादीन्मुनीश्वरान्॥४२॥ कोटिसूर्यसमाभासानुवाच मुनिपुंगवः॥ ना
रद उवाच॥ इदानीं भूरिभाग्येन भवद्भिः संगमो गतः॥४३॥ कुमारा वदताशीघ्रं कृपां कृ
त्वा ममोपरि॥ भवंतो योगिनः सर्वे बुद्धिमंतो बहुश्रुताः॥४४॥ पंचहायनसंयुक्ताः पूर्वेषा
मपि पूर्वजाः॥ सदा वैकुंठनिलयाः हरिकीर्तनतत्पराः॥४५॥ लीलामृतरसोन्म
त्ताः कथामात्रैकजीवनाः॥ हरिः शरणमेवं हि नित्यं येषां मुखे वचः॥४६॥ अतः कालस
मादिष्टा जरा युष्मान्न बाधते॥ येषां भ्रूभंगमात्रेण द्वारपालौ हरेः पुरा॥ भूमौ निप
तितौ सद्यो यत्कृपातः परं गतौ॥ अहो वै भाग्ययोगेन दर्शनं भवतामिह॥४८॥ अनुग्रह
स्तु कर्तव्यो मयि दीने दयापरैः॥ अशरीरगिरोक्तं यत्तत्किं साधनमुच्यतां॥४९॥ अ
नुष्ठेयं कथं तावत्प्रब्रुवंतु सविस्तरं॥ भक्तिज्ञानविरागाणां कथमुत्पद्यते सुखं॥५०
स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः॥ श्रीसनत्कुमारा ऊचुः॥ मा चिंतां कुरु वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०मा
१

वदतामिह॥३॥कुमारा ऊचुः॥श्रूयतां नारद वक्ष्यामो विनम्राय विवेकिने॥गंगाद्वारसमीपे तु
तटमानंदनामकं॥४॥नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितं॥नानातरुलताकीर्णं
नवकोमलवालुकं॥५॥रम्यमेकांतदेशस्थं हेमपद्मसुसौरभं॥यत्समीपस्थजीवानां वैरं चेतसि
संध नं स्थितं॥६॥ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः॥अपूर्वा रसरूपा च कथा तत्र भवि
ष्यति॥७॥पुरस्थं निर्बलं चैव जराजीर्णकलेवरं॥तद्द्वयं च पुरस्कृत्य भक्तिस्तत्रागमिष्य
ति॥८॥यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत्॥कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते॥
सूत उवाच॥एवमुक्त्वा कुमारास्ते नारदेन समं ततः॥गंगातटं समाजग्मुः कथापानाय सत्वरा
राः॥१०॥यदा याताः तटं ते तु तदा कोलाहलोऽप्यभूत्॥भूर्लोके देवलोके च ब्रह्मलोके त
थैव च॥११॥श्रीभागवतपीयूषपानाय रसलंपटाः॥धावंतोऽप्याययुः सर्वे प्रथमं ये च
वैष्णवाः॥१२॥भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ॥रामस्तथा गाधि
सुतश्च शाकलो मृकंडपुत्रात्रिजपिप्पलादाः॥योगेश्वरौ व्यासपराशरौ च छायाशु
को [illegible]जाजलिजह्नुमुख्याः॥सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः स्वस्त्रीभिराययुरतिप्रणये
नयुक्ताः॥१४॥वेदांतानि च वेदाश्च मंत्रास्तंत्राः समूर्तयः॥दश सप्त पुराणानि षट्शास्त्रा
णि तथाऽऽययुः॥गंगाद्याः सरितस्तत्र पुष्करादिसरांसि च॥क्षेत्राणि च दिशः सर्वा दंड
का[illegible]दिवनानि च॥१६॥नगादयो ययुस्तत्र देवगंधर्वकिंनराः॥गुरुत्वात्तत्र नायाता राम
१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जाता भागवती कथा॥ अत्युन्नता ततो भाति पृथक्भूता फलाकृतिः॥६६ आमूलाग्रं रस
स्तिष्ठन्नाम्रे न स्वाद्यते यथा॥ संभूयः संपृथग्भूतः फले विश्वमनोहरः॥६७॥ यथा दुग्धे
स्थितो सर्पि र्निस्वादायोपकल्पते॥ पृथग्भूतं हि तद्गव्यं देवानां रसवर्द्धनं॥६८॥ इक्षू
णामादिमध्यांतं शर्करा व्याप्य तिष्ठति॥ पृथग्भूता च सा मिष्टा तथा भागवती कथा॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितं॥ भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितं॥७०
वेदवेदांतसुस्नाते गीताया अपि कर्त्तरि॥ परितापवति व्यासे मुह्यत्यज्ञानसागरे॥७१
तदा त्वया पुरा प्रोक्तं चतुश्लोकसमन्वितं॥ तदीयश्रवणात्सद्यो निर्बाधो बादरायणः॥७२
तत्र ते विस्मयः कस्मात् यतः प्रश्नकरो भवान्॥ श्रीमद्भागवतं श्राव्यं शोकदुखविना
शनं॥७३॥ नारद उवाच॥ यद्दर्शनं च विनिहंत्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवा
र्दितानां॥ निःशेषशेषमुखगीतकथैकपानात्प्रेमप्रकाशकृतये शरणं गतोस्मि॥७४
भाग्योदयेन बहुजन्मसमार्जितेन॥ सत्संगमं च लभते पुरुषो यदा वै॥ अज्ञानहेतुकृत
मोहमहांधकारनाशं विधाय हि तदोदयते विवेकः॥७५॥ इति श्रीपद्मपुराणे उत्तरखं
डे श्रीमद्भागवतमाहात्म्ये निस्तवरो कुमारनारदसंभाषणो नाम द्वितीयोध्यायः॥
श्री नारद उवाच॥ ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्वलं॥ भक्तिज्ञानविरागाणां स्थापनाथ
र्थं प्रयत्नतः॥१॥ कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह॥ महिमा शुकशास्त्रस्य वक्तव्यो
वेदपारगैः॥२॥ कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा॥ को विधिस्तत्र कर्त्तव्यो ममेदं ब्रू

न९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१४ पृथिव्याप्तेजोद्रव्यानाश्रितौ गुणौ तत्त्वे सति गुणत्वात् यत्पुनः पृथिव्याप्तेजोद्रव्यातिरिक्तद्रव्याश्रितो गुणेन भवति नासौ पृथि
व्याप्तेजोद्रव्यानाश्रितो गुणो न भवति यथा रूपादीनि केवलव्यतिरेकी अन्वयव्यतिरेकी वा तथाहि बुद्ध्यादयः पृथि
व्याप्तेजोद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याप्तेजोद्रव्यानाश्रितत्वे सति गुणत्वात् योयद्नाश्रितो गुणः स तदति
रिक्ताश्रितो भवति यथा पृथिव्याद्यनाश्रितः शब्दः पृथिव्याद्यतिरिक्ताकाशाश्रय इति तदेवं पृथिव्याप्ते
द्रव्यातिरिक्तं नवमं द्रव्यमात्मा सिद्धः स च सर्वत्र कार्योपलम्भाद्विभुः परममहत्परिमाणवानित्यर्थः विभुत्वाच्च नि
त्यो व्योमवत् सुखादिवैचित्र्यात्प्रतिशरीरं भिन्नः तस्य भोगायतनमन्त्यावयवि शरीरं सुखदुःखसाक्षा
त्कारो भोगः स च यदवच्छिन्ने आत्मनि जायते तद्भोगायतनं तदेव शरीरं चेष्टाश्रयो वा शरीरं चेष्टा हिताहि
तप्राप्तिपरिहारार्थी क्रिया न तु स्पन्दनमात्रम् इन्द्रियादावतिव्याप्तिपरिहाराय अन्त्यावयवी शरीरं संयुक्तं ज्ञान
करणमतीन्द्रियम् अतीन्द्रियमित्युच्यमाने कालादेरिन्द्रियत्वप्रसंगः अतः उक्तं ज्ञानकरणमिति ज्ञा
नकरणमित्युच्यमाने तथापीन्द्रियार्थसन्निकर्षे अतिप्रसंगो न उक्तं शरीरसंयुक्तमिति शरीरसंयुक्तं
ज्ञानकरणमित्युच्यमाने आलोकस्यापीन्द्रियत्वप्रसंगः अतउक्तमतीन्द्रियम् तानि चेन्द्रियाणि षट्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामः ७

यप्रवृत्तिजनकं यथाप्रमाणमाभास इति केवलव्यतिरेकी अत्राफलत्वप्रवृत्तिजनकत्वं इतिपावत् निर्द्धारितं अनेनकेवलव्यति
रेक्यनुमानेनानभ्यासदशापन्नस्य ज्ञानस्य प्रमाण्यंबोधितं अनेन दृष्टांते नप्रवृत्तेः पूर्वमेवतज्जातीयत्वेनलिंगेनान्वय
व्यतिरेक्यनुमानेनाभ्यासापन्नज्ञानस्याभ्यासदशापन्नस्य प्रमाण्यमनुमीयते अतःपरतएवप्रामाण्यंनज्ञानग्राहकेनैव
ज्ञानगृह्यते चत्वार्येवप्रमाणानि युक्तिलेशोक्तिःसर्वकम् केशवो बालबोधाय यथाशास्त्रं वर्णयत् १ इति
तर्कभाषायांप्रमाणपदार्थः प्रमाणान्युक्तानि प्रमेयाण्युच्यंते आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रे
त्यभावफलदुःखापवर्गाप्रमेयमिति सूत्रं तत्रात्मत्वसामान्यवानात्मा सचदेहेंद्रियव्यतिरिक्तः प्रति
शरीरंभिन्नोविभुर्नित्यश्च स च मानसप्रत्यक्षः विप्रतिपत्तौ तु बुद्ध्यादिगुणाश्रितावेति स्वबुद्ध्यादयो न भूतानांगुणाः
मानसप्रत्यक्षत्वात् ये हि भूतानांगुणास्ते मनसा न गृह्यंते यथा रूपादयः नापि दिक्कालमनसांगुणाः विशे
षगुणत्वात् ये हि दिक्कालादिगुणाः ते हि संख्यादयो न ते विशेषगुणाः ते हि सर्वद्रव्यसाधारणगुणाएव बुद्ध्य
दयस्तु विशेषगुणाः गुणत्वेसत्येकेंद्रियग्राह्यत्वात् रूपवत् अतोनदिगादिगुणास्तस्मादेभ्योष्टभ्योव्यतिरिक्तो
बुद्ध्यादीनां गुणानामाश्रयोद्रव्यं वक्तव्यः सएवात्मा प्रयोगश्च बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA